श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

प्रतिवादिभयङ्कर श्री अनन्ताचार्य विरचितं

# ॥ श्री वेङ्कटेश स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेङ्कटेश स्तोत्रम् ॥

कमलाकुचचूचुक कुङ्कुमतो नियतारुणितातुलनीलतनो।
कमलायतलोचन लोकपते विजयी भव वेङ्कटशैलपते ॥ 1 ॥

सचतुर्मुखषण्मुखपञ्चमुखप्रमुखाखिलदैवतमौलिमणे।
शरणागतवत्सल सारनिधे परिपालय मां वृषशैलपते ॥ 2 ॥

अतिवेलतया तव दुर्विषहैरनुवेलकृतैरपराधशतैः।
भरितं त्वरितं वृषशैलपते परया कृपया परिपाहि हरे ॥ 3 ॥

अधिवेङ्कटशैलमुदारमतेर्जनताभिमताधिकदानरतात्।
परदेवतया गदितान्निगमैः कमलादयितान्न परं कलये ॥ 4 ॥

कलवेणुरवावशगोपवधूशतकोटिवृतात्स्मरकोटिसमात्।
प्रतिवल्लविकाभिमतात्सुखदात् वसुदेवसुतान्न परं कलये ॥ 5 ॥

अभिरामगुणाकर दाशरथे जगदेकधनुर्धर धीरमते।
रघुनायक राम रमेश विभो वरदो भव देव दयाजलधे ॥ 6 ॥

अवनीतनयाकमनीयकरं रजनीकरचारुमुखाम्बुरुहम्।
रजनीचरराजतमोमिहिरं महनीयमहं रघुराममये ॥ 7 ॥

सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकायममोघशरम्।
अपहाय रघूद्वहमन्यमहं न कथञ्चन कञ्चन जातु भजे ॥ 8 ॥

विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि।
हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥ 9 ॥

अहं दूरतस्ते पदाम्भोजयुग्म प्रणामेच्छयाऽऽगत्य सेवां करोमि।
सकृत्सेवया नित्यसेवाफलं त्वं प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश॥ **10** ॥

अज्ञानिना मया दोषान् अशेषान् विहितान् हरे।
क्षमस्व त्वं क्षमस्व त्वं शेषशैलशिखामणे॥ **11** ॥

॥ इति श्री वेङ्कटेश स्तोत्रं समाप्तम्॥